M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1204

Title: Vata Savitri Puja

1204

Complete

		Vaṭā Sāvitrī Pūjā	Title
			Author
			Editor
			Year, Vols.
			Publisher
1204			Remarks

श्रीगणेशाय नमः श्रीसत्यवंतवटसावित्री
नमः ॥ अथ वटसावित्रिपूजाविधिः ॥ वट
मूले स्थितो ब्रह्मा वटमध्ये जनार्दनः ॥ व
टाग्रे तु शिवः स्थित्वा सावित्रीवटसंयुता ॥
वटसिंचामि ते मूलं सलिलैरमृतोपमैः ॥
सूत्रेण वेष्टये भक्त्या गंधपुष्पाक्षतैः शुभैः ॥
मम इह जन्मनि जन्मांतरे च अवैधव्यप्राप्त
ये भर्तृ चिरायुष्यारोग्यसंपदादिकाम
नया वटसावित्रीपूजनमहं करिष्ये भू
मिं स्पृष्ट्वा ॥ कलशं संस्थाप्य ॥ संपूज्य ॥
अथ ध्यानं ॥ पद्मपत्रासनस्थश्च ब्रह्मा भा
र्ययान्वितश्चतुर्मुखः ॥ सावित्री तस्य कर्तव्या रामा

व०पू० र्सं गंगतातथा॥ ब्रह्मणासहसावित्रींसत्य
१ वत्सहिते प्रिये॥ ध्यानं॥ ब्रह्मणासहितांदे
वीसावित्रींलोकमातरं॥ सत्यव्रतंचसावि
त्रींवटंचावाहयाम्यहं॥ आवाहनं॥ ब्रह्मणा
सहसावित्रीसत्यवत्सहितेप्रिये॥ हेमासनं
गृह्यतांत्वं धर्मराजस्येश्वर॥ आसनं॥ गं
गाजलंसमानीतंपाद्यार्थंब्रह्मणप्रिये॥
भक्त्यापादत्वंधर्मराजसावित्रीप्रतिगृह्यतां॥
पाद्यं॥ भक्त्यासमाहृतंतोयंफलपुष्पसम
न्वितं॥ अर्घ्यंगृहाणसावित्रिममसत्यव्र
तेप्रिये॥ अर्घ्यं॥ सुगंधिसहकर्पूरस्करभिः
स्वादुशीतलं॥ ब्रह्मणासहसावित्रीकुरु १
ष्वाचमनीयकं॥ आचमनीयं॥ पयोदधि

पत्तं चैव शर्करया मधुसंयुतं ॥ पंचामृतेनैन स्न
पनं गृह्यतां परमेश्वरो ॥ पंचामृतस्नानं ॥ श्री
दाकिन्याः समानीतं हेमांभोरुहवासितं ॥
सावित्रीब्रह्मराजं च स्नानार्थं प्रतिगृह्यतां ॥
स्नानं ॥ सूक्ष्मजंतुमयं वस्त्रयुग्मं कामसंस
भवे ॥ सावित्रिविटयुक्ताभ्यां दत्तं त्रिविक्र
युतो ॥ वस्त्रं ॥ सावित्रिसत्यवत्कांते भूर्भवेस
ज्जकेरम्बरं ॥ सावित्री ब्रह्मण्यासो ध्रुवपर्वी
तं तु गृह्यतां ॥ उपवीतं ॥ भूषणानि च दिव्या
नि मुक्ताहारयुतानि च ॥ त्वदर्थं मुपकल्पता
नि महापद्मभलोचने ॥ भूषणानि ॥ कुंकु
मागरुकर्पूरकस्तुरीरोचनायुतं ॥ चंदनं
ते मया दत्तं सावित्री प्रतिगृह्यतां ॥ चंदनं ॥
सौभाग्यद्रव्याणि ॥ हरिद्राकुंकुमं चैव

सिंदूरकज्जलोन्मिश्रितं ।। सौभाग्यद्रव्यसंयुतं
व॰ पू॰ सावित्रिप्रतिमायां वै सौभाग्यद्रव्यं ।। माल्या
दीनि तु पुष्पाणि ।। अथांगपूजा ।। सावित्र्यै
२ नमः ।। पादौ पूजयामि ।। वटप्रियायै॰ जंघे॰
कमलपत्राक्ष्यै॰ कटिं॰ कृतमालिन्यै॰ उदरं पू॰
मायायै॰ कंठं पू॰ ब्राह्मणप्रियायै॰ मुखं पू॰
सौभाग्यदात्र्यै॰ शिरः पू॰ अथ ब्रह्मसव
तापूजा ।। धात्रे॰ पादौ॰ विधात्रे॰ जंघे पू॰ स्र
ष्ट्रे॰ ऊरू पू॰ प्रजापतये॰ मेढ्रं॰ परमेष्ठिने॰
कटिं पू॰ अग्निरूपायन॰ नाभिं पू॰ पद्मना
हृदये पू॰ वेधसे॰ बाहू॰ विरिंचिने॰ कंठं पू॰
हिरण्यगर्भाय॰ मुखं पू॰ ब्रह्मरूपेन॰ शिरः पू॰ वि २
ष्णावेन॰ सर्वांगं पू॰ ।। देवद्रुमरसोद्भूतं काला

करुसमन्वितं ॥ ओअमतामसंधूपंत्या[illegible]
प्रतिगृह्यतां ॥ धूपं ॥ चक्षुर्दसर्वलोकानां ति[illegible]
रस्यनिवारणं ॥ आर्तिक्यं कल्पितं भ[illegible]ग
हाणपरमेश्वरि ॥ दीपं ॥ अन्नं चतुर्विधं
स्वादुरसैषड्भिसमन्वितं ॥ मयानिवेदितं
तुभ्यानेवेद्यंप्रतिगृह्यतां ॥ नैवेद्यं ॥ मध्ये
उत्तरापोशानं ॥ इदं फलंमिति फलं ॥ पूगीफ
लमितितांबूलं ॥ हिरंण्यगर्भेतिदक्षिणा ॥
नमो ब्रह्मण्यदेवि त्वंसततं ब्रह्मणप्रिये ॥
पंचार्तिक्यंमया दत्तंगृहाणसुरपूजिते ॥
नीराजनं ॥ यानिकानीतिप्रदक्षिणा ॥
सावित्रीत्वंप्रसावित्रिसततं ब्रह्मणप्रिये ॥
पूजितासिद्विजैः सर्वैः स्त्रिभिर्मुनिचयैस्त

व॰पू॰ था ॥ त्रिसंध्यं देवि भूतानां चंदनीयासुरा
भने ॥ मयादत्ता च पूजेयं त्वं गृहाण नमोस्तु
२ ते ॥ पुष्पांजलिं ॥ ततः अर्घ्यत्रयं दद्यात् ॥ ओं
कारपूर्वके देवी सर्वदुःख निवारिणि ॥ देवि
मातर्नमस्तुभ्यं सौभाग्यं च प्रयच्छ मे ॥ वटसावि
त्रीभ्यां नमः ॥ अर्घ्यं समर्पयामि ॥ पतिव्रते मह
भागे ब्राह्मणी च शुचिस्मिते ॥ दृढव्रते दृढम
ते भर्तुश्च प्रियवादिनि ॥ अर्घं० ॥ अवैधव्यं च
सौभाग्यं देहि त्वं मम सुव्रते ॥ पुत्रान्पौत्रांश्च
सौभाग्यं गृहाणार्घ्यं नमोस्तु ते ॥ अर्घं ॥
सावित्री ब्रह्मगायत्री सर्वदा प्रियभाषिणी ॥
तेन सत्येन मां पाहि दुःखसंसारसागरात् ॥
त्वं गौरी त्वं शुचि लक्ष्मी त्वं प्रभा चंद्रमंडले ॥

त्वमेवचजगन्मातात्वमुद्धरवरानने॥यन्म
यादुष्कृतंसर्वंकृतंजन्मशतैरपि॥अस्माभि
र्वनुतत्सर्वंअवैधव्यंचदेहिमे॥अवियोगो
यथादेवसावित्र्यासहितस्तव॥अवियोग
स्तथास्माकंभूयाज्जन्मनिजन्मनि॥इतिप्रा
र्थना॥इतिपूजाविधिः॥ततःपूजासांगतासि
ध्यर्थंब्राह्मणायवायनप्रदानंकरिष्ये॥फल
वस्त्रसमायुक्तंसौभाग्यद्रव्यसंयुतं॥वंशपा
त्रेतिध्यायाद्वोब्राह्मणायनिवेदयेत्॥उपाय
नमिदंदिव्यंफलसंपूर्णहितवे॥वायनकंद्विज
वर्यायसहिरण्यंददाम्यहं॥इतिवायनं॥व
टसावित्रीपूजासमाप्तः॥शके१७४५सुभानु
नामसंवत्सरे॥ज्येष्ठशु१५त्रयोदशी॥॥